# Shrinivasavirachita Shrihara Stuti

# શ્રીનિવાસવિરચિતા શ્રીહરસ્તુતિઃ

## Document Information

Text title : Shrinivasavirachita Shri Hara Stuti

File name : harastutiHshrInivAsavirachitA.itx

Category : shiva, stuti

Location : doc_shiva

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 49 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : September 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2023

*sanskritdocuments.org*

# શ્રીનિવાસવિરચિતા શ્રીહરસ્તુતિઃ

ૐ શ્રીગણેશાય નમઃ ।
પ્રાગ્દયતાં ગણનાથો વિદ્યાં વિતરિતુમુદારકાલીનામ્ ।
આદ્રિયતાં ગણનાથો બહુધા બૃન્દારકાલીનામ્ ॥ ૧॥

હિમ્મકરકલિકોત્તસઃ શમયતિ તાપં હૃદિ પ્રવૃત્તં સઃ ।
શુચમનિરાકુર્વાણૈર્મિતનિર્વાણૈઃ કિમન્યગીર્વાણૈઃ ॥ ૨॥

શ્રુતિશાસ્ત્રગીયમાનં નિષ્પરિમાણં તથા નિરુપમાનમ્ ।
શમ્ભો તવ મહિમાનં કસ્તુષ્ટૂષુર્લભેત સીમાનમ્ ॥ ૩॥

સત્યાં તવ હિ કૃપાયાં તવ પદભક્તિં ગિરીશ સમુપાયામ્ ।
સ્થિતિમથ સૌખ્યોપાયાં કલયેયં સદ્ગતિં ચ નિરપાયામ્ ॥ ૪॥

વિમલપયોદાભસિતં સ્ફુરતિ યદઙ્ગેષુ સર્વદા ભસિતમ્ ।
કણ્ઠશિરઃશ્રુતિભુજગાઃ સ્ફુરન્તિ ફણમણિમરીચિભિર્ભુજગાઃ ॥ ૫॥

યદ્યપિ ચર્મ વસાનો દૃષ્ટોઽસિ ત્વં શુભા હિ દિવસા નઃ ।
અવતુ દયા તવ સા નઃ ફલતિ સુખાબ્ધિર્યયા નિરવસાનઃ ॥ ૬॥

શ્રુતિશાસ્ત્રદુર્નિરૂપો વપુરર્ધાકલિતવરતનૂરૂપઃ ।
અપિ ચક્ષુષા વિરૂપો વિતરસિ ભજતામભીષ્ટમનુરૂપઃ ॥ ૭॥

ગઙ્ગા બહુકલ્લોલા જટાસુ ચલિતું ન ચાશકલ્લોલા ।
ભક્તજનૈઃ સ્નપિતો યં બહુ મનુષે કલુષમલ્પમપિ તોયમ્ ॥ ૮॥

શૈલદુહિત્રા તારં સમુપદિશસિ યો ભવામ્બુધિત્રાતારમ્ ।
ગતકિલ્વિષભારોઽહં હૃદયે ત્વાં ભાવયામિ વૃષભારોહમ્ ॥ ૯॥

સમધિષ્ઠિતકૈલાસો દીનોદ્ધારૈકનિશ્ચિતવિલાસઃ ।
ઉમયા સદા વિહરસે મમાપિ ચિન્તાં ત્વમેવ પરિહરસે ॥ ૧૦॥

ઇતિ શ્રીનિવાસવિરચિતા હરસ્તુતિઃ સમ્પૂર્ણામ્ ।

The author was the son of Lakshmi and
Venkatesha and belonged to the vAjasaneyishAkhA.
He has composed two other stotras, Haristuti
and Hariharastuti.

(૪૯)

Proofread by Sivakumar Thyagarajan Iyer

*Shrinivasavirachita Shrihara Stuti*

pdf was typeset on September 23, 2023

Please send corrections to *sanskrit@cheerful.com*